# 2.4.8 - Supporting Document

January 2016 To June 2016 04 सोमज्योतिः




संस्कृतकविसम्मेलने उपस्थिताः मञ्चस्थाः कवयः

## संस्कृतकविसम्मेलनम्

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम् तथा गुजरात- साहित्य- अकादमी- गान्धीनगरम् इत्यनयोः संयुक्तोपक्रमेण स्वस्तिश्रीविक्रमाब्द २०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे सायं संस्कृतकविसम्मेलनं समायोजितमासीत् । सन्दर्भेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयश्च स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादं च कारितवन्तः । तत्र निमन्त्रिताः कवयः इत्थम् आसन् - प्रो.रामकरणशर्म, प्रो.कमलेशदत्तत्रिपाठी, प्रो.अम्बालालप्रजापति, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. मिथिलाप्रसादत्रिपाठी, प्रो.रामलखनपाण्डेयः, प्रो. हर्षदेवमाधवः, डॉ. जयप्रकाशनारायणद्विवेदी, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. शिवजीउपाध्यायः, डॉ. अमृतलालभोगायता, डॉ. उमाकान्तचतुर्वेदी, प्रो.रामकुमारशर्म, डॉ. उमारमणझा, प्रो.रमेशकुमारपाण्डेयः, डॉ. शङ्करजीझा, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो.उमाशङ्करशर्म, डॉ. बलदेवानन्दसागरः, श्री भाग्येशझा, प्रो.राजेन्द्रनाणावटी, प्रो.रामसुमेरयादवः च । अस्य कार्यक्रमस्य सञ्चालनं डॉ. नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः ।

## सांस्कृतिककार्यक्रमः

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठयाः अङ्गतयैव विशेषाकर्षणरूपेण सांस्कृतिककार्यक्रमः विश्वविद्यालयेन ८-२-२०१६ तमे दिनाङ्के समायोजितः आसीत् । कार्यक्रमेऽस्मिन् भावाश्रितानि रसाश्रितानि नृत्यानि विशेषप्रयोगपूर्वकाणि नाटकानि च अभवन् । पुनश्च गुर्जरसंस्कृतमिश्रभावाश्रितं यत्सञ्चालनं अध्यापकाः अकुर्वन् तत्तु सर्वाधिकाद्भुतमेव । मान्याः कुलपतिवर्याः अस्य कार्यक्रमस्य सफलतायै ये अध्यापकाः ये च छात्राः प्रयत्नं कृतवन्तः तान् पुरस्कारादिभिः आशीर्वचोभिश्च सम्मानितवन्तः । कार्यक्रमस्यास्य संयोजनं कृतवन्तः डॉ. दीपेशकतिरा, डॉ. ललितपटेलः, डॉ. अमृतलालभोगायता च ।





सांस्कृतिककार्यक्रमाः

***Somjyoti*** *(The University News Letter – Issue 13, Page – 16*

## त्रिदिवसीयाखिलभारतीयवैदिकसंगोष्ठी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, उज्जैनस्य-महर्षि सान्दिपनीराष्ट्रियवेदविद्याप्रतिष्ठानम्, एवञ्च सन्तश्री सन्ध्यागीरीबापुसंस्कृत-महाविद्यालयः, सामख्याली इत्येषां संयुक्तत्तत्त्वावधाने एका त्रिदिवसीया अखिलभारतीया वैदिकसंगोष्ठी ११-०९-२०१७ तः १३-०९-२०१७ पर्यन्तम् आयोजिता। तत्र कार्यक्रमस्य उद्घाटनसत्रे दिनाङ्के ११-०९-२०१७, सोमवासरे गुजरातराज्यस्य महामहिमशालिनः राज्यपालाः प्रो. ओ.पी. कोहलीमहोदयाः कार्यक्रमस्य उद्घाटकरूपेण उपस्थिता आसन्। अस्यां संगोष्ठ्यां मुख्यातिथिरूपेण योगदानं दत्वा श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य कुलपतिपादाः प्रो. अर्कनाथचौधरीमहाभागाः सर्वान् उद्बोधितवन्तः। महर्षिसान्दीपनीराष्ट्रियवेदविद्याप्रतिष्ठानस्य उपाध्यक्षाः प्रो. रवनीन्द्रमुले महाभागाः मुख्यवक्तृरूपेण योगदानं विधाय सभायाः शोभावर्धनं कृतवन्तः। कार्यक्रमस्य संयोजकः डॉ. शत्रुघ्नपाणिग्राहिमहोदयः प्रास्ताविकं तथा च कार्यक्रमस्य रूपरेखाविषयं सूचितवान्। कार्यक्रमेऽस्मिन् कर्मकाण्डसंस्कारविज्ञानमिति विचारालोके बहूनि शोधप्रत्राणि विभिन्न-प्रदेशेभ्यः समागतैः विद्वद्भिः प्रस्तुतानि। तत्रापि प्राप्तानां शोधपत्राणां कर्मकाण्डसंस्कारविज्ञानं पुस्तकरूपेण प्रकाशनं जातम्। प्रकाशनकर्मणि तथा च आवासभोजनादिव्यवस्थायां तत्रत्याः स्वामिनारायण भगवङ्गिरी-महोदयानां योगदानम् अतीव महत्त्वपूर्णम् आसीत्। कार्यक्रमस्य समापनसत्रेपि अध्यक्षरूपेण सभामण्डपं मण्डयन्तः माननीयाः कर्णाटकराजस्य महामहिम-राज्यपाल-महोदया आसन्। तस्मिन् दिवसे मुख्यवक्तृरूपेण कच्छप्रान्तस्य सांसदः श्री विनोदभाईमहोदयाः, विशिष्टातिथिरूपेण अजमेरतः समागताः स्वामिचरणाः श्री शिवन्योतिषानन्दगिरीमहोदयाः, सारस्वतातिथिरूपेण श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य मान्याः का. कुलसचिवपादाः प्रो. महेन्द्रकुमार दवेमहाभागाः उपस्थिता आसन्। येषां महानुभवानां आगमनेन कार्यक्रमः सुसम्पन्नः सञ्जातः तेषु वैदिकेषु प्रो. श्रीकिशोरमिश्राः, प्रो. लक्ष्मीश्वर झा, प्रो. मनोजमिश्रः झा, प्रो. रामराज उपाध्यायाः, प्रो. रवीन्द्र भट्टाचार्यमहोदयाः, प्रो. महेन्द्रपाण्डेमहोदयाः, प्रो. प्रभातरञ्जनमहापात्राः, प्रो. कमलेशमिश्राः, प्रो. प्रतिभामञ्जरीरथ-महोदया, प्रो.कमलेश चोक्सिमहाशयाः, प्रो. प्रलयकुमारनन्दमहोदयाः, प्रो. विश्वनाथस्वाईमहाशयाः, प्रो. दुर्गाचरणषडङ्गोमहोदयाः, प्रो. हितेषजानी महोदयाः तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वे आचार्याः, प्राचार्याः, उपाचार्या आसन्। अस्य कार्यक्रमस्य निर्देशकः प्रो. देवन्द्रनाथ पाण्डेय आसीत्। माननीयानां कुलपतिपादानां कुलसचिवपादानां च मार्गदर्शनेन कार्यक्रमस्य संयोजकरूपेण डॉ. शत्रुघ्नपाणिग्राहिमहोदयः कार्यम् अकरोत्। समापनसत्रे कार्यक्रमस्य प्रतिवेदनं प्रो. विनोदकुमारमहोदयैः प्रस्तुतम्। समापनसत्रे च सुचारु सञ्चालनं डॉ. अश्विन राजगोर महोदयैः कृतमासीत्।

***Somjyoti*** *(The University News Letter – Issue 15, May-2017 to April-2018, Page – 04*

***Somjyoti*** *(The University News Letter – Issue 15, May-2017 to April-2018, Page – 04*

# पुराणधर्मशास्त्रीया कार्यशाला

नवम्बरमासस्य २० दिनाङ्कात् २३ दिनाङ्कं यावत् नटपुरस्थ-श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये दिनचतुष्टयसाध्या पुराण-धर्मशास्त्रकार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयः एवञ्च श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तोपक्रमेण "श्रीमद्भागवतमहापुराणं तदागमस्तत्स्वाध्यायश्च" इति विषयमधिकृत्य कुलपतेः प्रो. गोपबन्धुमिश्रस्य प्रेरणया पद्मश्रीडाह्याभाईशास्त्रिणः मार्गदर्शनेन च समजायत। अस्यां कार्यशालायां स्वशास्त्रे कृतभूरिपरिश्रमाः विद्वांसः प्रदत्तविषयमाश्रित्य व्याख्यानानि प्रायच्छन्। तेषां व्याख्यानैः स्वाध्यायकर्मभिश्च विविधविद्यालयेभ्यः आगताः विद्यार्थिनः नितरां ज्ञानान्विताः मुदमलभन्त। एतस्यां कार्यशालायां मुख्यसंयोजकरूपेण पुराणसङ्कायाध्यक्षः डॉ. पङ्कजकुमाररावलः अथ च स्थानीयसंयोजकरूपेण ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलालभोगायता स्वदायित्वम् निरवहत्। अस्यां पुराणकार्यशालायाम् अमीषां विदुषां वैदुष्यपूर्णानि व्याख्यानानि अभूवन् – डॉ. नरेन्द्रकुमार पण्ड्या, कृष्णदत्त शास्त्री, डॉ. योगेशभाई पण्ड्या, महेशजोषी, डॉ. पङ्कजकुमार रावलः, डॉ. अमृतलाल भोगायता, हेमेन्द्रभाई दवे, डॉ. कृष्णप्रसाद निरौला, डॉ. क्षितीश्वरनाथ पाण्डेयः, भद्रेश व्यासः, डॉ. कृणालभाई जोषी च।



*__Somjyoti__ (The University News Letter – Issue 22, October to January-2020, Page – 09*

## श्रीडाकोर-संस्कृत-पाठशालायां व्याकरणशास्त्रपुनश्चर्याकार्यशाला



व्याकरणकार्यशालायां भाषमाण: डॉ. कृष्णप्रसादनिरौलामहोदय:

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसङ्काय: पारम्परिकशास्त्राणां संरक्षणाय संवर्धनाय अभ्यासाय च १० त: १२ सितम्बर २०१८ पर्यन्तं व्याकरणाभ्यासक्रमे प्रचाल्यमानस्य लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणं केन्द्रीकृत्य दिवसत्रयव्यापिनीमेकां कार्यशालां समायोजयत। कार्यशालेयं श्रीडाकोर-संस्कृत-पाठशालायाम् अभूत्। अस्यां कार्यशालायां विश्वविद्यालयसम्बद्धमहाविद्यालयेषु व्याकरणविषयस्य विद्वांसोऽध्यापका: शोधच्छात्राश्च भागगृह्णन्। कार्यशालायामस्यां श्रीडाकोर-संस्कृत-पाठशालापक्षत: आवासस्य भोजनस्य च व्यवस्था कल्पिता। कार्यशालायेयं उद्घाटनसत्रेण आरब्धा समापनसत्रेण च पूर्णतां प्राप्ता। सम्पूर्णायायां कार्यशालायामस्यां दश व्याख्यानानि अभवन्। अत्र व्याख्यातृणां नामानि तेषां विषया: अधोलिखिता: सन्ति:-

| | | | | | |
|---|---|---|---|---|---|
| १. डॉ. वाचस्पति मिश्र: | - | चतुर्दशसूत्रेषु सन्ध्याद्यभावविचार: | २. डॉ. नरसिंह भोगायता | - | चतुर्दशसूत्र्यां श्रुतित्वविचार: |
| ३. डॉ. कृष्ण प्रसाद निरौला | - | रँ प्रत्याहारविचार: | ४. प्रो. विनोद कुमार झा | - | अन्योन्याश्रयदोषपरिहारविचार: |
| ५. श्री रविशंकर राजगोर: | - | उपदेशपदार्थविचार: | ६. डॉ. अर्जुन सामल: | - | ऊकालोऽज्झस्वदीर्घप्लुत: |
| ७. श्री योगेश पण्ड्या | - | तुल्यास्यप्रयत्नं सवर्णम् | ८. सन्दीप बी. पण्ड्या | - | पूर्वत्राऽसिद्धम् |
| ९. डॉ. क्षितीश्वरनाथ पाण्डेय: | - | अणुदित्सवर्णस्य चाऽप्रत्यय: | १०. डॉ. अश्विन भाई राजगोर: | - | वृद्धिरादैच् |

अत्र संयोजकत्वेन उतरदायित्वं प्रो. विनोद कुमार झा- डॉ. वाचस्पतिमिश्रौ तथा च स्थानीयसंयोजकत्वेन उतरदायित्वं डॉ. अजयभाई ठाकरमहोदय: अवहन्।

***Somjyoti** (The University News Letter – Issue 17-18, May to December-2018, Page – 05*

## ब्रह्मर्षिधाम्नि समायोजिता पुराणेतिहासधर्मशास्त्रानुसन्धानकार्यशाला



कार्यशालाया: उद्घाटनस्य कानिचन दृश्यानि

वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालय: किञ्च नडियादस्थ-ब्रह्मर्षिसंस्कृतमहाविद्यालय: इत्यनयो: संयुक्तसहकारेण २६.०९.२०१८ दिनाङ्कत: २८.०९.२०१८ पर्यन्तं ब्रह्मर्षिसंस्कार-धामपरिसरे विश्वविद्यालयस्य पुराणसङ्कायेन पुराणेतिधर्मशास्त्रानुसन्धानकार्यशाला समायोजि। एतस्या: संस्थाया: प्रमुखविश्वस्तै: पद्मश्रीडाह्याभाईशास्त्रिमहोदयै:, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरणै: आचार्यै: गोपबन्धुमिश्रमहोदयै: प्रधानाचार्यचरै: डॉ. कृष्णप्रसादनिरौलामहोदयै: च स्वीयगरिममयोपस्थित्या कार्यशालेयं साफल्यं प्रापिता। वाल्मीकीयरामायणम् अधिकृत्य विविध-विद्वद्भिरस्यां कार्यशालायां सरसव्याख्यानानि अदियन्त।

साधु: श्रुतिप्रकाशदास:, डॉ. वसन्तकुमारभट्ट:, डॉ. वसन्तभाईपरिख:, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमाररावल, डॉ. शान्तिकुमारपण्ड्या, श्रीजितेन्द्रकुमारव्यास, श्रीभद्रेशभाईव्यास:, डॉ. अमृतलाल भोगायता तथा च अन्ये विद्वांस: इमां कार्यशालां शास्त्रगर्भितै: स्वव्याख्यानै: व्यभूषयन्। विविधमहाविद्यालयेभ्य: प्राध्यापका: अपि अत्र भागमगृह्णन् किञ्च छात्रै: अपि व्याख्यानश्रवणमक्रियत।









***Somjyoti** (The University News Letter – Issue 17-18, May to December-2018, Page – 07*

# साहित्यशास्त्रे विशिष्टव्याख्यानम्



साहित्यशास्त्रे विशिष्टव्याख्यानं विदधान: प्रो. रहसविहारीद्विवेदी

श्रीसोमनाथसंस्कृतविश्वविद्यालय: काले काले विविधविधाशाखासु पण्डितमण्डितविदुषां विशिष्टव्याख्यानि आयोजयति। अस्मिन् क्रमे २१-०९-२०१९ तमे दिनाङ्के साहित्यसङ्कायेन जबलपुरस्थ-राणीदुर्गावती-विश्वविद्यालयस्य प्राप्तावकाशप्राध्यापकस्य प्रो. रहसविहारीद्विवेदिवर्यस्य साहित्यशास्त्रे विशिष्टं व्याख्यानं समायोजि। संशोधनकार्यं कथं सम्पादनीयमित्यस्मिन् विषयेऽपि बोधदायकं शोधदृष्टिप्रदञ्च व्याख्यानं प्रो. द्विवेदिवर्येण प्रदत्तम्। अस्मिन् विशिष्टव्याख्याने साहित्यविभागस्य प्राध्यापका: अन्तेवासिनश्च सार्धहोराद्वयव्यापिविशिष्टव्याख्यानम् अश्रौषु:। नैकोदाहरणपुर:सरं स्वकीयविशिष्टशैल्या प्रो. रहसविहारिद्विवेदिवर्य: सर्वान् समबोधयत्। अस्मिन् प्रसङ्गे माननीयकुलपते: प्रो. गोपबन्धुमिश्रवर्यस्यापि प्रेरकोपस्थिति: आसीत्। अस्य विशिष्टव्याख्यानस्य सञ्चालनं प्रो. महेन्द्रकुमारदवे अकरोत्।

***Somjyoti*** *(The University News Letter – Issue 20-21, April to September-2019, Page – 07*

## “अलङ्कारनिर्णयः” इति विषये समायोजिता साहित्यशास्त्रीया कार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २६-०८-२०१९ तः ३०-०८-२०१९ पर्यन्तं पञ्चदिवसीया साहित्यशास्त्रीया “अलङ्कारनिर्णयः” इति विषये कार्यशाला समायोजिता आसीत्। अस्यां कार्यशालायां विश्वविद्यालयपरिसरच्छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः उपपञ्चविंशतिः छात्राः भागं गृहीतवन्तः। अस्याः कार्यशालायाः उद्घाटनं माननीयकुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य किञ्च कुलसचिवस्य डॉ. दशरथजादवस्य आध्यक्ष्ये सम्पन्नम्। उद्घाटनसमापनकार्यक्रमे विश्वविद्यालयस्य आचार्याः, उपाचार्याः सहायकाचार्याः छात्राश्च सहभागिनोऽभवन्। कार्यशालायाः उद्घाटनसत्रे माननीयकुलपतिना उक्तं यत् यथा अलङ्काराः शरीरस्य शोभां वर्धयन्ति तथैव साहित्यग्रन्थेषु काव्येष्वपि अलङ्काराः काव्यचमत्कृतिं जनयन्ति। कार्यशालायामस्यां विभिन्नालङ्कारिकग्रन्थैः उदाहरणपुरस्सरं सरलरीत्या सुबोधरीत्या च अलङ्कारपाठनम् अक्रियत। अस्यां प्रि.डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. अर्चनाकुमारीदुबे, प्रि. डॉ. अमृतलाल भोगायता, डॉ. कलिदासठाकरश्च व्याख्यानानि प्रदत्तवन्तः। अस्याः कार्यशालायाः संयोजनं प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या अकरोत्।




अलङ्कारनिर्णयः इति कार्यशालायाः समारोपसमारोहे प्रतिभागिभिः सह प्राध्यापकाः

***Somjyoti*** *(The University News Letter – Issue 20-21, April to September-2019, Page – 07*

## श्रीसोमनाथसंस्कृतविश्वविद्यालयः

राजेन्द्र भुवनमार्गः, वेरावलम् – ३६२२६६ (गीरसोमनाथ-जनपदः)

## दर्शनसङ्काय-कार्यशाला

विषयः - **दर्शनेषु पारिभाषिकपदानां परिचयः**

दिनाङ्कः - **23 तः 27 दिसम्बर, 2019**

**उद्घाटनकार्यक्रमः**

- मान्यवराः मञ्चस्थाः भवन्ति १०.३० - १०.३२
- वेदघोषसहितं दीपप्रज्ज्वालनम् १०.३२ - १०.३५
- कुलगीतस्य आलापनम् १०.३५ – १०.४०
- वाक्कुसुमैः स्वागतम्, प्रास्ताविकं च १०.४० – १०.४५
- पुष्पगुच्छैः स्वागतम् १०.४५ – १०.४७
  - डॉ. विश्वनाथ धितालः - प्रो. गोपबन्धु मिश्रः
  - प्रो. गोपबन्धु मिश्रः – डॉ. उमा माहेश्वरी
  - डॉ. दशरथ जादवः –
  - प्रो. अर्चना कुमारी दुबे –
- उद्बोधनम् –
  - डॉ. दशरथ जादवः १०.४७ – १०.५२
  - डॉ. विश्वनाथ धितालः १०.५३ – ११.०५
  - प्रो. गोपबन्धु मिश्रः ११.०६ – ११.२०
- धन्यवादज्ञापनम् – डॉ. उमा माहेश्वरी ११.२१ – ११.२२

मञ्चसञ्चालनम् – डॉ. जानकीशरण आचार्यः

*Brochure of Darshana Workshop*

# श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्ता 'समास'विषयिणी व्याकरणकार्यशाला



'समास'विषयिण्याः व्याकरणकार्यशालायाः दीपप्रज्जावलनेन उद्घाटनं कुर्वन्तः कुलपतिः प्रो. गोपबन्धु मिश्रः, प्रो. रबीन्द्रभट्टचार्यः इतरे च महानुभावाः

२०१९तमस्य वर्षस्य डिसेम्बरमासस्य तृतीयात् दिनात् सप्तमं दिनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये 'बहुव्रीहिसमासः' इति विषयमाश्रित्य छात्रोपयोगिनी कार्यशाला प्रावर्तत। कार्यशालायामस्यां विश्वविद्यालयच्छात्रैः सममेव विश्वविद्यालय-संबद्धेभ्यः चतुर्दशभ्यः महाविद्यालयेभ्यः आगताः ५८ छात्रा भागमवहन्। श्रीजगन्नाथसंस्कृत-विश्वविद्यालस्य कुलपतिचराः संस्कृतविभागाध्यक्षचराश्च प्रो. किशोरचन्द्र पाढी महोदयाः समुपस्थाय छात्राणां मार्गदर्शनमकुर्वन्। श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य व्याकरण-विभागाध्यक्षाः प्रो. विनोद कुमार झा महोदयाः, व्याकरणप्राध्यापकः डॉ. दीपेश विनोद कतिरा महोदयः चापि कार्यशालायां मार्गदर्शनमकुर्वन्। वेदव्याकरण-कार्यशालयोः संयुक्तोद्घाटन-समापनकार्यक्रमयोः विश्वविद्यालयस्य कुलपतयः कुलसचिवाः च समुपस्थाय समवेतान् प्रेक्षकान् समुदबोधयन्।



व्याकरणकार्यशालायां पाठयन् प्रो. श्रीकिशोरचन्द्र पाढी वर्यः

***Somjyoti*** *(The University News Letter – Issue 22, October to January-2020, Page - 07*

# वेदकार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०३.१२.२०१९ तः ०७.१२.२०१९ पर्यन्तं पञ्चदिवसीया निरुक्तस्य प्रथमाद्वितीयाध्यायौ अवलम्ब्य एका वेदविषयककार्यशाला समायोजिता आसीत्। अस्यां वेदविभागकार्यशालायां विश्वविद्यालयपरिसरस्य त्रिंशत् छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः षोडशच्छात्राः भागग्रहणं कृतवन्तः। कार्यक्रमस्य प्रारम्भः कुलपतिः प्रो. गोपबन्धुमिश्रः प्रदीपप्रज्वालनपूर्वकम् अकरोत्। तदनु वैदिकमङ्गलाचरणं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रैः कृतम्। अस्य कार्यक्रमस्य उद्घाटनसत्रे माननीयकुलपतिना स्वकीयाध्यक्षीयभाषणे प्रतिपादितं यत् यथा वेदार्थज्ञानाय व्याकरणादिशास्त्राणाम् आवश्यकता विद्यते तथैव निरुक्त-शास्त्रस्यापि महत्त्वपूर्णभूमिका वर्तते। निर्वचनज्ञानाय निरुक्तशास्त्रस्यापेक्षा वर्तते। अनन्तरं कोलकाताविश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः प्रो.रवीन्द्रभट्टाचार्यः अङ्गैः सह वेदानामध्ययनकर्तव्यमिति प्रत्यपादयत्। अस्याः कार्यशालायाः समापनं कुलसचिवस्य डा. दशरथजादवस्य एवञ्च वेदवेदाङ्गसङ्कायाध्यक्षस्य प्रो. देवेन्द्रनाथपाण्डेयस्य आध्यक्षे सम्पन्नम्। कार्यशालायामस्यां कार्यक्रमस्य निदेशकः प्रो. देवेन्द्रनाथ पाण्डेयः, कोलकताविश्वविद्यालयस्य प्रो.रवीन्द्र भट्टाचार्यः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागस्याचार्यः प्रो. रामानुज उपाध्यायः, डॉ. शत्रुघ्न पाणिग्राही च व्याख्यानानि प्रदत्तवन्तः। अस्याः कार्यशालायाः संयोजनं डॉ. शत्रुघ्न पाणिग्राही अकरोत्।




वेदकार्यशालायां भागगृहीतारः छात्राः महानुभावैः सह




वेदव्याकरणकार्यशालयोः समापनसत्रस्य किञ्चन दृश्यम्

*Somjyoti (The University News Letter – Issue 22, October to January-2020, Page – 07*

## ब्रह्मर्षिधाम्नि आयोजिता व्याकरणशास्त्रकार्यशाला



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८ तः ३०.१२.२०१८ पर्यन्तं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये "धातूद्देश्यकाः प्रत्ययाः" इति विषयमाश्रित्य अभिनवा एका व्याकरणकार्याशाला समायोजिता आसीत्। अस्यां विविधमहाविद्यालयेभ्यः प्रायः ६२ विद्यार्थिनः अध्ययनाय समागताः। डॉ. पुष्पादीक्षितमहोदयया स्वीयया विशिष्ट्या शैल्या धातूद्देश्यकाः प्रत्ययाः इति विषये नितरामध्यापनकर्म अक्रियत। उद्घाटनसत्रे ब्रह्मर्षिसंस्कृतमहाविद्यालय-नडियादप्रमुखाः पूज्याः पद्मश्रीडाह्याभाई शास्त्रिणः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्याः आचार्याः गोपबन्धुमिश्रमहाभागाः, ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यचराः डॉ. कुष्णप्रसादनिरौलाः, प्रो. वसन्तकुमारभट्टाश्च उपस्थिताः भूत्वा प्रासङ्गिकोद्बोधनम् अकार्षुः। प्रो. विनोदकुमार झा अस्याः कार्याशालायाः प्रमुखसंयोजकः, डॉ. दिपेशकतिरा च संयोजकः आस्ताम्। स्थानीयसंयोजकरूपेण श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलाल भोगायता तथा च स्थानीयसहसंयोजकः डॉ. क्षितीश्वरनाथपाण्डेयः अविद्यत।



***Somjyoti** (The University News Letter – Issue 17&18, May to December-2018, Page – 13*

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

## अन्ताराष्ट्रियः परिसंवादः - 'भाष्यपरम्परा ज्ञानप्रवाहश्च'

### शैक्षणिकसत्रविवरणम् - 11.02.2020

| दिनाङ्कः ११/०२/२०२० | शैक्षणिकसत्रम् - १ समयः - मध्याह्ने १२.०० तः ०१.०० |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. श्रीनिवास वरखेडी |
| सञ्चालकः | डॉ. ललित कुमार पटेलः |
| संवाददाता (Reporter) | श्री जिगर भट्टः |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | प्रो. आनन्द मिश्रा & Naphtali Meshel | What Is This Commentary? New Discoveries from the Archive of Rav Yehuda Hindu'a |
| २. | प्रो. वसन्तकुमार भट्टः | अभिज्ञानशाकुन्तल की टीका-परम्परा |
| ३. | डॉ. शैलेष पवारः | षड्दर्शनसमुच्चय ग्रंथ की टीकाओं का समीक्षात्मक अध्ययन |

| दिनाङ्कः ११/०२/२०२० | शैक्षणिकसत्रम् - २ समयः - मध्याह्ने १२.०० तः ०१.०० |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | साधु भद्रेशदास महाराजः |
| विशिष्टातिथिः | प्रो. पङ्कज एल्. जानी, कुलपतिः – महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयः |
| सञ्चालकः | डॉ. शत्रुघ्न पाणिग्राही |
| संवाददाता (Reporter) | डॉ. डी. एम्. मोकरिया |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | साधु श्रुतिप्रकाशदासः | ब्रह्मसूत्रस्वामिनारायणभाष्ये प्रथमसूत्रे निरूपितस्य ब्रह्मद्वयस्य विचिकित्साविविधाचार्याणां दृष्टिकोणैः |
| २. | साधु आत्मतृप्तदासः | प्रस्थानत्रयी-स्वामिनारायण भाष्य निरूपित अक्षरपुरुषोत्तम दर्शन का जीवन पर प्रभाव |
| ३. | साधु अक्षरानन्ददासः | The Bhagavadgītā-Svāminārāyaṇabhāṣya: Introduction, Survey and Contributions |

| दिनाङ्कः ११/०२/२०२० | शैक्षणिकसत्रम् - ३ समयः - अपराह्ने ०२.३० तः ३.३० |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. ललित त्रिपाठी |
| सञ्चालकः | प्रो. महेन्द्रकुमार अ. दवे |
| संवाददाता (Reporter) | श्री दिलीप त्रिवेदी |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | दीप्तेश कनौजिया | Strategies of effective Digitization of Commentaries and Subcommentaries towards constructing of textual history |
| १. | प्रो. पीटर् शार्फ् & डॉ. तनुजा अजोतिकर् | Development of a TEI standard for digital Sanskrit texts containing commentaries |
| २. | डॉ. एम्. सुदर्शन चिपलूणकर् | लक्षणानिरूपणप्रसङ्गे काव्यप्रकाशनिदर्शनस्य वैशिष्ट्यं तत्पूर्ववर्तिव्याख्यापरिशीलनञ्च |

| दिनाङ्कः ११/०२/२०२० | शैक्षणिकसत्रम्  – ४  समयः - अपराह्णे ०२.३० तः ३.३० |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | साधु भद्रेशदास महाराजः |
| विशिष्टातिथिः | प्रो. पङ्कज एल्. जानी, कुलपतिः – महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयः |
| सञ्चालकः | डॉ. विपुल जादवः |
| संवाददाता (Reporter) | श्री नित्यानन्द ओझा |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | साधु ब्रह्मसेतुदासः | The Upaniṣad Svāminārāyaṇa Bhāṣyam<br>& its Contributions to Vedāntic Thought and Practice |
| २. | साधु ज्ञानानन्ददासः | The Integration and Distinction of 'Logic, Text and Guru' in the Light of theSvāminārāyaṇa-Bhāṣyam |
| ४. | श्री कुश देपाला | Examining the Development of Cross-Disciplinary Style in a Modern Commentary |

| दिनाङ्कः ११/०२/२०२० | विशिष्टं व्याख्यानम् – I  समयः - अपराह्णे ०३.४५ तः ०४.३० |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. कमलेशदत्त त्रिपाठी |
| सञ्चालकः | प्रि. डॉ. नरेन्द्र कुमार एल्. पण्ड्या |
| संवाददाता (Reporter) | सुश्री राखी जैन |

| क्रमः | वक्ता | विषयः |
|---|---|---|
| १. | पद्मश्रीः प्रो. अभिराज राजेन्द्र मिश्रः | संस्कृतभाष्यपरम्परा ज्ञानप्रवाहश्च |

### शैक्षणिकसत्रविवरणम् - 12.02.2020

| दिनाङ्कः १२/०२/२०२० | शैक्षणिकसत्रम् – ५ समयः - प्रातः १०.०० तः ११.४५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. हरेराम त्रिपाठी |
| सञ्चालकः | डॉ. जानकीशरण आचार्यः |
| संवाददाता (Reporter) | डॉ. दीपेश विनोद कतिरा |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | डॉ. गणेश ईश्वर भट्टः | वेदान्तसूत्रभाष्यपरम्परायां विवर्तवादः |
| २. | डॉ. विश्वनाथ धितालः | प्राच्यज्ञानपरम्परायां भाष्यावदानम् |
| ३. | डॉ. धर्मेन्द्रकुमार सिंहदेवः | त्रिनयन-भाष्य-विमर्शः |
| ४. | डॉ. दयानन्द पाणिग्राही | श्रीमच्छङ्करविरचितमनीषापञ्चकस्य श्रीसदाशिवेन्द्रयोगिकृततात्पर्यदीपिका- श्रीबालगोपालेन्द्रमुनिकृतमधुमञ्जरीटीकयोः पर्यालोचनम् |
| ५. | डॉ. चिन्मयी हृषीकेश देवधर | Advaitic Interpretation of Māṇḍūkya Upaniṣad (A review of Gauḍapādakārikā and Śāṅkarabhāṣya) |
| ६. | बुद्धदेव दासः | श्रीमच्छङ्कराचार्यविरचितब्रह्मसूत्रभाष्यदिशा अवस्थात्रयविचारः |

| दिनाङ्कः १२/०२/२०२० | शैक्षणिकसत्रम् – ६ समयः - प्रातः १०.०० तः ११.४५ |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | प्रो. सोमनाथ नेने |
| सञ्चालकः | डॉ. पङ्कजकुमार रावलः |
| संवाददाता (Reporter) | श्री मेहुल भट्टः |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | प्रो. सुब्राय वि. भट्टः | शाबरभाष्यस्य वैशिष्ट्यम् |
| २. | श्री धर्मेन्द्रदासः | Significant of Kāśikā As A Text of Commentary on Aṣṭādhyāyī |
| ३. | जिज्ञेश रावलः | An Intertextual Study of the Gītā Commentaries in the Svāminārāyaṇa Saṁpradāya |
| ४. | वीणा राज | Śaṅkara’s Commentary on Bṛhadāraṇyaka Upaniṣad-A study of Interpretational Techniques |
| ५. | रवि देशशङ्कर जानी | अप्रसिद्धार्थप्रकटने व्याख्याकृतां सामर्थ्यम् |
| ६. | ब्रजेश कश्यपः | टीकापरम्परा तथा काव्यप्रकाशप्रदीपस्य प्रदीपोद्योतस्य च काश्चन विशेषताः |

| दिनाङ्कः १२/०२/२०२० | विशिष्टं व्याख्यानम् – II समयः - पूर्वाह्ने १२.०० तः १२.४५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. गोपबन्धु मिश्रः, कुलपतिः |
| सञ्चालकः | डॉ. दीपेश विनोद कतिरा |
| संवाददाता (Reporter) | डॉ. बी. उमा महेश्वरी |

| क्रमः | वक्ता | विषयः |
|---|---|---|
| १. | प्रो. श्रीनिवास वरखेडी | पञ्चिकाप्रपञ्चः |

| दिनाङ्कः १२/०२/२०२० | शैक्षणिकसत्रम् - ७ समयः - अपराह्णे ०२.३० तः ०४.१५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. कमलेशदत्त त्रिपाठी |
| सञ्चालकः | प्रो. विनोद कुमार झा |
| संवाददाता (Reporter) | डॉ. तनुजा अजोतिकर् |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | प्रो. सोमनाथ नेने | व्याख्याग्रन्थों के आलोक में मीमांसा के अर्थ निर्धारण का सातत्य |
| २. | प्रो. गंगाधर पण्डा | श्रीमद्भागवतमहापुराणटीकासम्पत्तेर्विस्तारः |
| ३. | डॉ. वी. यमुना देवी | Vanauṣadhivarga in the light of Amarakoṣodghāṭana of Kṣīrasvāmin the earliest extant full commentary on Amarakoṣa |
| ४. | डॉ. जयकृष्ण शर्मा | लक्ष्मीधरविरचितस्य चक्रपाणिविजय-महाकाव्यस्य व्याकरणदृष्ट्या सुप्रभाटीका-विमर्शः |
| ५. | डॉ. कालिदास भाई ठाकरः | संस्कृतवाङ्मये मन्त्रसूत्र-कारिकादिसमीक्षासाधनेषु उपकार्योपकारकभावविवेकः |
| ६. | चन्दन मुखर्जी | शाङ्कराद्वैतपरम्परायां प्रस्थानप्रवाहः |

| दिनाङ्कः १२/०२/२०२० | शैक्षणिकसत्रम् - ८ समयः - अपराह्णे ०२.३० तः ०४.१५ |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | प्रो. गङ्गाधर पण्डा |
| सञ्चालकः | डॉ. डी. एम्. मोकरिया |
| संवाददाता (Reporter) | डॉ. रमेशचन्द्र शुक्लः |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | अनुपम सान्याल् | श्रीमद्भगवद्गीतायाः काश्मीरिकशैवपरम्परानुगटीकासु सर्वतोभद्रटीकायाः वैशिष्ट्यम् |
| २. | दयानन्द ए. आर्. शर्मा | पातञ्जलयोगसूत्रभाष्यदिशा चित्तपरिणामविमर्शः (योगसूत्राणां साम्प्रदायिकव्याख्यानां परिशीलनेन कृतः) |
| ३. | डॉ. दीनानाथ दासः | कुमारसम्भवमहाकाव्यस्य विद्यामाधवीयव्याख्यानस्य वैशिष्ट्यम् |
| ४. | डॉ. माधवी उपाध्यायः | ऋग्वेद के भाष्यकारों का स्थल-काल अबाधित वेद संरक्षण – एक भौगोलिक एवं सामयिक सर्वेक्षण |
| ५. | दुर्गाशरण रथः | काण्वशाखायाः भाष्यपरम्परायां विद्यारण्यानन्दबोधस्वामिनोर्योगदानम् |
| ६. | हार्दिक एम्. राज्यगुरुः | अलङ्कारशास्त्राध्ययने साहित्यदर्पणस्य 'लक्ष्मी'टीकायाः महत्त्वम् |
| ७. | मिहिर गिरीशभाई पण्ड्या | श्रीमद्भागवते व्याख्यातॄणां स्वकीयं वैशिष्ट्यप्रदानम् |

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

## अन्ताराष्ट्रियः परिसंवादः - 'भाष्यपरम्परा ज्ञानप्रवाहश्च'

### शैक्षणिकसत्रविवरणम् - 13.02.2020

| दिनाङ्कः १३/०२/२०२० | शैक्षणिकसत्रम् – ९ समयः - प्रातः १०.०० तः ११.४५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. अर्कनाथ चौधरी |
| सञ्चालकः | डॉ. बी. उमा महेश्वरी |
| संवाददाता (Reporter) | डॉ. पङ्कजकुमार रावलः |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| २. | प्रो. हरेराम त्रिपाठी | न्यायसूत्रस्य भाष्यपरम्परा ज्ञानपरम्परा च |
| ३. | डॉ. अमृतलाल भोगायता | श्रीमद्भागवतं वेत्तुमनन्याश्रयीभूता श्रीधरीटीका |
| ४. | डॉ. बनमाली बिश्वालः | महानन्द विरचित सारस्वती प्रक्रिया की द्वादशपक्षीया टीका – शास्त्रीय-पाण्डित्य-परम्परा का भव्य निदर्शन |
| ५. | डॉ. नरेन्द्रकुमार एल्. पण्ड्या | श्रीमद्भागवतदशमस्कन्धीयगोपीगीते विविधव्याख्यानां वैशिष्ट्यविमर्शः |
| ६. | डॉ. लक्ष्मीकान्त षडङ्गी | भार्गवराघवीयमहाकाव्ये महाकविरामभद्राचार्यस्य स्वाभिनवभाष्यनैपुण्यम् |
| ७. | भावी भगतः | What's in a Name?: Commentarial Analysis of the Exposition to the Bhagvad Gītā |

| दिनाङ्कः १३/०२/२०२० | शैक्षणिकसत्रम् – १० समयः - प्रातः १०.०० तः ११.४५ |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | प्रो. भीमसिंहः |
| सञ्चालकः | प्रो. अर्चना कुमारी दुबे |
| संवाददाता (Reporter) | डॉ. ललित कुमार पटेलः |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | डॉ. ब्रजभूषण ओझा | |
| २. | प्रो. जयप्रकाश नारायण द्विवेदी | ऋग्वेद की भाष्यपरम्परा एवं इन्द्रचरित्र |
| ३. | डॉ. शत्रुघ्न पाणिग्राही | आचार्यसायणस्य वैदिकभाष्यप्रवृत्तिः आलोचनासिद्धान्तश्च |
| ४. | सुश्री भारती वी. कोळेकर् | Definitions and Kinds of Commentaries in the Light of Tantrayukti |
| ५. | हर्षदा सावरकर | Commentarial Assistance in interpretingAnukramaṇī texts |
| ६. | डॉ. पङ्कजकुमार जैनः | जैनाचार्य वीरसेनकृत 'धवला' टीका का वैशिष्ट्य |

| दिनाङ्कः १३/०२/२०२० | विशिष्टं व्याख्यानम् – III समयः - पूर्वाह्ने १२.०० तः १२.४५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. गोपबन्धु मिश्रः, कुलपतिः |
| सञ्चालकः | श्री जिगर भट्टः |
| संवाददाता (Reporter) | डॉ. ललितकुमार पटेलः |

| क्रमः | वक्ता | विषयः |
|---|---|---|
| १. | प्रो. अर्कनाथ चौधरी | महाभाष्ये विभाषापदार्थः |

| दिनाङ्कः १३/०२/२०२० शैक्षणिकसत्रम् - ११ | समयः - अपराह्णे ०२.३० तः ०४.१५ |
|---|---|
| स्थलम् - | मुख्यसभामण्डपम् |
| अध्यक्षः - | प्रो. वसन्तकुमार भट्टः |
| सञ्चालकः | डॉ. तनुजा अजोतिकर् |
| संवाददाता (Reporter) | प्रो. अर्चना कुमारी दुबे |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | प्रो. ललित त्रिपाठी | वैशेषिकदर्शनस्य सामान्यविशेषविषयकसूत्राणां व्याख्यानपरम्परायां विसङ्गतयः तासां परिहारश्च |
| २. | प्रो. रबीन्द्र कुमार पण्डा | शिशुपालवधमहाकाव्योपरि विरचितयोः सर्वङ्कषासन्देहविषौषधिनामधेययोः टीकयोः सर्जनादृष्ट्या तुलनात्मकम् अवलोकनम् |
| ३. | डॉ. बृहस्पति भट्टाचार्यः | Attributes of Mahabhasya and grammar: A novel touch in Sanskrit tradition |
| ४. | डॉ. प्रियव्रत मिश्रः | भाष्यकारीययोगविभागवैचित्र्यम् |

| दिनाङ्कः १३/०२/२०२० शैक्षणिकसत्रम् - १२ | समयः - अपराह्णे ०२.३० तः ०४.१५ |
|---|---|
| स्थलम् - | प्रकोष्ठसंख्या – २३ |
| अध्यक्षः - | प्रो. आनन्द मिश्रः |
| सञ्चालकः | डॉ. रमेशचन्द्र शुक्लः |
| संवाददाता (Reporter) | सुश्री राखी जैन |

| क्रमः | वक्तारः | विषयाः |
|---|---|---|
| १. | प्रो. भीमसिंहः | संस्कृत व्याकरण शास्त्र में भाष्येष्टियों का महत्त्व |
| २. | प्रो. विनोद कुमार झा | शास्त्रतत्त्वावबोधनाय टीकाग्रन्थानाम् अवदानम् (व्याकरणशास्त्रावलोके) |
| ३. | रिचा बिश्वाल | Abhinavagupta’s Contribution to the Tradition of Commentaries (With Reference to Rasa –Theory) |
| ४. | समर्थ वी. ओझा | पाणिनीयसूत्राणाम् अर्थघटने महाभाष्यस्य सहकारिता |